संस्कृत वार्ता:

17/08/2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· मुख्यनिर्वाचनायुक्तेन श्रीज्ञानेशकुमारेण प्रख्यापितं यत् निर्वाचनायोगाय सर्वाण्यपि राजनैतिकदलानि समानानि सन्ति । निर्वाचनायोगः स्वसंवैधानिककर्तव्यात् न कदापि विमुखीभविष्यति ।

· प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां एकादश-सहस्रकोटिरूप्यकाणां द्वयोः राष्ट्रियराजमार्ग-परियोजनयोः उद्घाटनं विहितवान् ।

· जम्मू-कश्मीरस्य कठुआजनपदे अद्य प्रातः आकस्मिक-मेघविस्फोटेन जलप्लावेन च सप्तजनाः मृत्युमुपगताः, पञ्चजनाश्च व्रणिताः अभवन् । तत्र सहाय्योद्धार कार्यं सजवं प्रचलति।

· भाजपासंसदीयमण्डलस्य उपवेशनमद्य नवदिल्लीस्थे दलस्य मुख्यालये प्रचलति ।

· डूरंड कप फुटबाल इति प्रतियोगितायाः प्रागुप्रांत्यचक्रे अद्य मोहन-बागान- सुपर-जायंट्स इति दलम् ईस्ट-बंगाल दलम् सम्मुखी करिष्यति।

<u>निर्वाचनायोगस्य विवरणम्</u>

निर्वाचनायोगेन अद्य प्रोदीरितं यत्, तस्य कृते सर्वाण्यपि राजनैतिकदलानि समानानि सन्ति, सः राजनैतिकदलेषु परस्परं भेदभावं नैव करोति। अद्य मध्यान्हे नवदिल्ल्यां वार्ताहरान् सम्बोधयता मुख्यनिर्वाचनायुक्तेन श्रीज्ञानेशकुमारेण प्रख्यापितं यत् निर्वाचनायोगः स्वसंवैधानिककर्तव्यात् न कदापि विमुखीभविष्यति। तेन प्रोक्तं यत्, केचन द्विविधमतदानस्य आरोपणं कुर्वन्ति, परञ्च यदा प्रमाणं पृच्छ्यते, तदा ते मौनास्तिष्ठन्ति । तेनोक्तं यत् निर्वाचनायोगः सहैव मतदातारः एतेषां मिथ्यारोपेण नैव बिभ्यति। मुख्यनिर्वाचनायुक्तेन स्पष्टीकृतं यत् निर्वाचनायोगः भेदभावं विना, निर्धनैः, धनिकैः, वृद्धैः, महिलाभिः, युवभिश्च सह, निर्भयतया स्थास्यति । तेन विज्ञापितं यत्, लोकसभानिर्वाचनेषु एककोट्यधिकाः शासकीयकर्मचारिणः, दशलक्षाधिकाः मतदानकक्षस्तरीय-प्रतिनिधयः, विंशतिलक्षाधिकाः पोलिंग-कर्मचारिणः अस्यां

प्रक्रियायां सम्मिलिताः आसन्। एवंविधायां पारदर्शी-प्रक्रियायां, मतदानवञ्चनां कथं कर्तुं शक्यते। मुख्यनिर्वाचनायुक्तेन प्रोक्तं यत्, सर्वाणि राजनैतिकदलानि मतदातृसूच्यां दोषाणां संशोधनं वाञ्छन्ति।

श्रीकुमारः अवदत् यत्, विशेषगम्भीर-पुनरीक्षणं बिहारराज्ये सभारब्धम्। श्रीकुमारः सबलं प्रोक्तवान् यत् बिहारस्य सप्तकोट्यधिकाः मतदातारः निर्वाचनायोगेन सह तिष्ठन्ति, अतः तस्य विश्वसनीयतायाः विषये प्रश्नः नैव कर्तुं शक्यते।

<u>पीएम दिल्ली परियोजना</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नव दिल्ल्यां प्रायः एकादशसहस्र-कोटिरूप्यकाणां प्रमुखयोः राष्ट्रियराजमार्गस्य द्वयोः परियोजनयोः उद्घाटनं विहितवान्। एतासु परियोजनासु द्वारका-एक्स्प्रेसवे इत्यस्य दिल्लीखण्डः, नगरीयविस्तारमार्गः यू ई आर द्वितीयभागश्च सम्मिलितौ स्तः। एताः परियोजनाः राष्ट्रियराजधान्यां यातायात अवरोधस्य न्यूनीकरणाय प्रशासनस्य व्यापकयोजनायाः अन्तर्गतं प्रकल्पिताः सन्ति। प्रधानमन्त्रिणा अवसरेऽस्मिन् "वोकल फोर लोकल" इत्यस्योपरि बलं प्रदत्तम्। सहैव तेन भारतीयोत्पादकेषु विश्वासार्थं क्रयणार्थञ्च जनाः निवेदिताः। राजमार्गयोजनानां उद्घाटनावसरे श्रीमोदिना प्रोदीरितं यत् राष्ट्रस्य दृढीकरणार्थं चक्रधरमोहनात् प्रेरणा ग्राह्या सहैव आत्मनिर्भरभारतस्य निर्माणार्थं सूत्रचक्रधरमोहनस्य मार्गः अनुसरणीयः। अस्मिन् अवसरे श्रीमोदी अवदत् यत् द्वारका एक्सप्रेसवे तथा यूआर-द्वितीयः इत्येतयोः दिल्लीखण्डस्य उद्घाटनेन सम्पूर्णे एनसीआर-मध्ये संयोजने नूतनाः उपलब्धयः प्राप्ताः भविष्यन्ति। सः अवदत् यत् एतेन जनानां आवागमने अपि समयस्य रक्षणं भविष्यति।

प्रधानमन्त्रिणा प्रोदीरितं यत् सर्वकारस्य कृते परिष्कारस्यार्थः सुशासनस्य विस्तारः वर्तते। दिल्ल्याः मुख्यमन्त्री रेखागुप्ता सर्वेषां दिल्लीवासिनां पक्षतः प्रधानमन्त्रिणे नरेन्द्र-मोदीवर्याय धन्यवादं प्रदत्तवती , सा अवदत् यत् सः जनानां विकासाय महद् कार्यं कृतवान् अस्ति। एतासां परियोजनानां उद्देश्यं दिल्लीनगरे तस्य परितः च क्षेत्रेषु संयोजने महत्त्वपूर्णं सौविध्यं प्रदानं , यात्रासमयस्य न्यूनीकरणं, सुचारु- यातायातस्य च सञ्चालनं वर्तते ।

## कठुआ-मेघविस्फोटः

जम्मू-कश्मीरस्य कठुआजनपदे अद्य प्रातः आकस्मिक-मेघविस्फोटेन जलप्लावेन च सप्तजनाः मृत्युमुपगताः, पञ्चजनाश्च व्रणिताः अभवन्। रात्रिसमये निरन्तर-तीव्रवृष्ट्या राजबागस्थलं वनप्रदेशाश्च आपद्ग्रस्ताः अजायन्त। ध्यातव्यमस्ति यत् आरक्षिदलानि, स्थानीयस्वयंसेवकाश्च आपदुद्धरणकार्ये संलग्नास्सन्ति । कठुआजनपदस्य विकासायुक्तः राजेशशर्मा वरिष्ठ-नागरिकपदाधिकारीभिः सह पर्यवेक्षणाय घटनास्थलम् अगच्छत् । जम्मूकश्मीरस्य सम्भागीय-आयुक्तेन रमेश कुमारेण प्रोदीरितं यत् उद्धरणकार्यं जायमानमस्ति सहैव जनानां संरक्षणं उदग्रयानेनापि विधीयते।

गृहमन्त्रिणा अमितशाहेन कठुआजनपदे मेघविस्फोटसम्बद्ध घटनामालक्ष्य उपराज्यपालेन मनोजसिन्हा इत्यनेन सह तथैव मुख्यमन्त्रिणा उमरअब्दुल्ला इत्यमुना च सह वार्तालापः सम्पादितः एवमेव केन्द्रपक्षतः सम्भवसाहाय्यञ्च प्रत्याश्वासितम् । मुख्यमन्त्रिणा उमरअब्दुल्ला इत्यमुना जनक्षतिसन्दर्भे शोकः व्यक्तीकृतः, सहैव प्रशासनाय जनसुरक्षायाः कृते निर्देशोऽपि प्रदत्तः।

## भाजपा-संसदीयमण्डलम्

भाजपासंसदीयमण्डलस्य उपवेशनमद्य नवदिल्लीस्थे दलस्य मुख्यालये प्रचलति । दलस्य सर्वे संसदीयमण्डलसदस्याः अस्मिन् उपवेशने सम्मिलिताः सन्ति। सूचनानुसारं उपवेशनेऽस्मिन् उपराष्ट्रपतिनिर्वाचनस्य प्रत्याशिनः विषये चर्चा भविष्यति । उपराष्ट्रपतिनिर्वाचनाय नामाङ्कनं गुरुवासरं यावत् निवेदयितुं शक्यते। निर्वाचनं तावत् आगामिमासस्य नवमे दिनाङ्के भविष्यति। जगदीपधनखड़स्य त्यागपत्र-प्रदानानन्तरं निर्वाचनमिदं आवश्यकं अभवत्।

## विक्रममिसरी-नेपालः

भारतीय विदेशसचिवः विक्रम मिसरी अद्य प्रातःकाले नेपालस्य विदेशसच्विवस्य आमन्त्रणमालक्ष्य द्विदिनात्मकायै राजकीययात्रायै काठमाण्डूनगरं संप्राप्तवान्। असौ अद्य सिंहदरबारनगरे प्रधानमन्त्रिणा के.पी शर्मा ओली वर्येण सह मेलनं विहितवान्। सः राष्ट्रपतिः रामचन्द्रपौडेलः, नेपालकाङ्ग्रेसदलस्य अध्यक्षः शेर बहादुर देउबा, सीपीएन दलस्य अध्यक्षः पुष्प कमल दहलः, विदेश मन्त्री आरजू राणा देउबा, चेत्येषां नेतृणां साकं मेलनं करिष्यति। श्री मिसरी विदेशसचिवेन अमृत राय बहादुर इत्यनेन सह प्रतिनिधिमण्डलस्तरीयां वार्ताम् अपि करिष्यति। उभयोः विदेशसचिवयोः मध्ये सम्पर्क-विकाससहयोगयो: सहैव अन्येषु द्विपक्षीयविषयेषु चर्चा भविष्यति।

## डूरंड कप

डूरंड कप फुटबाल इति प्रतियोगितायाः प्रागुप्रांत्यचक्रे अद्य मोहन-बागान- सुपर-जायंट्स इति दलम् ईस्ट-बंगाल दलम् सम्मुखी करिष्यति। इयम् स्पर्धा कोलकातायाः विवेकानंद-युवा-भारती-क्रीड़ांगणे सायं सप्तवादने भविष्यति।

।। इति वार्ता: ।।